१०२२ आच्छादनम्—आवरणम् ।
१०२४ शासनम्—निदेशः । (दण्डः)
१०२९ वजनम्—त्यागः (परिहारः)
१०३० संपर्चनम्—कौटिल्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

१०३१ षूङ् प्राणिगर्भविमोचने ।
१०३२ शीङ् स्वप्ने ॥ उदात्तावात्मनेभाषौ । अथ स्तौत्यन्ताः परस्मैपदिनो दश ॥
१०३३ यु मिश्रणेऽमिश्रणे च ।
१०३४ रु शब्दे । तु इति सौत्रो धातुः गतिवृद्धिहिंसासु ॥
१०३५ णु स्तुतौ ।
१०३६ टुक्षु शब्दे ।
१०३७ क्ष्णु तेजने ।
१०३८ ष्णु प्रस्रवणे । युप्रभृतय उदात्ता उदात्तेतः परस्मैभाषाः ॥
१०३९ ऊर्णुञ् आच्छादने ॥ उदात्त उभयतोभाषः ।
१०४० द्यु अभिगमने ।
१०४१ षु प्रसवैश्वर्ययोः ।
१०४२ कु शब्दे ।
१०४३ ष्टुञ् स्तुतौ ॥ द्युप्रभृतयोऽनुदात्ताः परस्मैभाषाः ॥ स्तौतिस्तूभयतो भाषः ॥
१०४४ ब्रूञ् व्यक्तायां वाचि ॥ उदात्त उभयतोभाषः ॥ अथ शास्यन्ताः परस्मैपदिनः ॥
१०४५ इण गतौ ।
१०४६ इङ् अध्ययने । नित्यमधिपूर्वः ॥
१०४७ इक् स्मरणे । अयमप्यधिपूर्वः ।
१०४८ वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु । (ई च)।
१०४९ या प्रापणे ।
१०५० वा गतिगन्धनयोः ।
१०५१ भा दीप्तौ ।
१०५२ ष्णा शौचे ।
१०५३ श्रा पाके ।
१०५४ द्रा कुत्सायां गतौ ।
१०५५ प्सा भक्षणे ।
१०५६ पा रक्षणे ।
१०५७ रा दाने ।

१०३१ प्राणिगर्भविमोचनम्–प्राणिप्रसवः ।
१०३३ मिश्रणम्–मेलनम् । अमिश्रणम्–अमेलनम् ।
१०३७ तेजनम्-तीक्ष्णीकरणम् ।
१०३८ प्रस्रवणम्–निस्यन्दनम् ।
१०४० अभिगमनम्—सर्वतो गमनम् ।
१०४६ अध्ययनम्—पठनम् ।
१०४७ स्मरणम्—चिन्तनम् ।
१०४८ प्रजनम् · गर्भग्रहणम् ।
१०५४ कुत्सागतिः–गर्हितगमनम् ।

In Public domain. Digitization Muthulakshmi Research Academy

१०५८ ला आदाने । द्वावपि दाने इति चन्द्रः ॥
१०५९ दाप् लवने ।
१०६० ख्या प्रकथने ।
१०६१ प्रा पूरणे ।
१०६२ मा माने ।
१०६३ वच परिभाषणे ॥ इण्प्रभृतयो ऽनुदात्ताः परस्मैभाषाः ॥ इङ् त्वात्मनेपदी ॥
१०६४ विद ज्ञाने ।
१०६५ अस भुवि ।
१०६६ मृजू शुद्धौ ।
१०६७ रुदिर अश्रुविमोचने ॥ विदादय उदात्ता उदात्तेतः परस्मैभाषाः ॥
१०६८ ञिष्वप् शये ॥ अनुदात्तः परस्मैभाषः ॥
१०६९ श्वस प्राणने ।
१०७० अन च ।
१०७१ जक्ष भक्षहसनयोः ॥ वृत् ॥
१०७२ जागृ निद्राक्षये ।
१०७३ दरिद्रा दुर्गतौ ।
१०७४ चकासृ दीप्तौ ।
१०७५ शासु अनुशिष्टौ ॥ श्वसादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ अथ पञ्च धातवश्छान्दसाः ।
१०७६ दीधीङ् दीप्तिदेवनयोः।
१०७७ वेवीङ् वेतिना तुल्ये ॥ उदात्तावात्मनेभाषौ ॥
१०७८ षस ।
१०७९ षस्ति स्वप्ने ।
१०८० वश कान्तौ ॥ षसादय उदात्ता उदात्तेतः परस्मैभाषाः ॥
१०८१ चर्करीतं च ।
१०८२ ह्नुङ् अपनयने ॥ अनुदात्त आत्मनेभाषः ॥ इ-

१०५८ आदानम्—ग्रहणम् ।
१०५९ लवनम्—छेदनम् ।
१०६३ परिभाषणम्--सर्वतः कथनम् ।
१०६७ अश्रुविमोचनम्--नेत्रजलत्यागः । (रोदनम्) ।
१०६८ शयः—शयनं (निद्रा)
१०६९ प्राणनं—जीवनम् ।
१०७२ निद्राक्षयः—जागरणम् ।
१०७३ दुर्गतिः -दुःखम् ।
१०७४ दीप्तिः—प्रकाशः ।
१०७५ अनुशिष्टिः—अनुशासनम् ।
१०७६ देवनम्—दुःखम् ।
१०८० कान्तिः—इच्छा ।
१०८२ अपनयनम्—दूरीकरणम् । इत्यदादयः ।

In Public domain. Digitization Muthulakshmi Research Academy

ति लुग्विकरणा अदाद-
यः ॥ २ ॥ (७२)

अथ जुहोत्यादयः ।

१०८३ हु दानादनयोः । आ-
दाने चेत्येके । प्रीणने
ऽपीति भाष्यम् ॥

१०८४ ञिभी भये ।

१०८५ ह्री लज्जायाम् ॥ जुहो-
त्यादयोऽनुदात्ताः पर-
स्मैभाषाः ॥

१०८६ पृ पालनपूरणयोः । पृ
इत्येके ॥ उदात्तः पर-
स्मैभाषः ॥

१०८७ डुभृञ् धारणपोषण-
योः ॥ अनुदात्त उभ-
यतोभाषः ॥

१०८८ माङ् माने शब्दे च ।

१०८९ ओहाङ् गतौ ॥ अनु-
दात्तावात्मनेपदिनौ ॥

१०९० ओहाक् त्यागे ॥ अनु-
दात्तः परस्मैपदी ॥

१०९१ डुदाञ् दाने ।

१०९२ डुधाञ् धारणपोषण-
योः ॥ दान इत्यप्येके ॥
अनुदात्तावुभयतोभा
षौ ॥ अथ त्रयः स्वरि-
तेतः ॥

१०९३ णिजिर् शौचपोषणयोः

१०९४ विजिर् पृथग्भावे ।

१०९५ विष्लृ व्याप्तौ ॥ णिजि-
रादयोऽनुदात्ताः स्वरि-
तेत उभयतोभाषाः ॥
अथ आगणान्ताः एका-
दश परस्मैपदिनश्छा-
न्दसाश्च ॥

१०९६ घृ क्षरणदीप्त्योः ।

१०९७ हृ प्रसह्यकरणे ।

१०९८ ऋ ।

१०९९ सृ गतौ ॥ घृप्रभृतयो
ऽनुदात्ताः परस्मैभाषाः॥

११०० भस भर्त्सनदीप्त्योः ॥
उदात्त उदात्तेत् परस्मै-
पदी ॥

११०१ कि ज्ञाने ॥ अनुदात्तः

१०८३ दानं–वितरणम् । अदनं भक्षणम् ।

१०८६ पूरणम्—तृप्तिः ।

१०८७ पोषणं—पालनम् ।

१०९१ दानं—स्वस्वत्वनिवृत्तिपूर्वक परस्व-
त्वोत्पादनम् ।

१०९४ पृथग्भावः—पृथक्करणम् ।

१०९५ व्याप्तिः—सम्बन्धः ।

१०९६ क्षरणं—प्रस्रवणम् ।

१०९७ प्रसह्यकरणम्—बलात्कारकरणम् ।

११०० भर्त्सनम्—अपकारः ।

In Public domain. Digitization Muthulakshmi Research Academy

परस्मैपदी ॥
११०२ तुर त्वरणे ।
११०३ धिष शब्दे ।
११०४ धन धान्ये ।
११०५ जन जनने । तुरादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ (२३)
११०६ गा स्तुतौ ॥ अनुदात्तः परस्मैभाषः ॥ घृप्रभृतय एकादश च्छन्दसि । इयर्ति भाषायामपि ॥ इति श्लुविकरणा जुहोत्यादयः ॥ ३ ॥

अथ दिवादयः ।

अथ उदात्ताः झॄषन्ताः परस्मैपदिनः ॥
११०७ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु
११०८ षिवु तन्तुसन्ताने ।
११०९ स्निवु गतिशोषणयोः ।
१११० ष्ठिवु निरसने । केचिदिहेम न पठन्ति ॥
११११ ष्णुसु अदने । आदान इत्येके । अदर्शन इत्यपरे ॥
१११२ ष्णसु निरसने ।
१११३ क्नसु ह्वरणदीप्त्योः ।
१११४ व्युष दाहे ।
१११५ प्लुषच ।
१११६ नृती गात्रविक्षेपे ।
१११७ त्रसी उद्वेगे ।
१११८ कुथ पूतीभावे ।
१११९ पुथ हिंसायाम् ।
११२० गुध परिवेष्टने ।
११२१ क्षिप प्रेरणे ।
११२२ पुष्प विकसने ।
११२३ तिम
११२४ ष्टिम ।
११२५ ष्टीम आर्द्रीभावे ।
११२६ व्रीड चोदने लज्जायां च ।
११२७ इष गतौ ।

११०५ जननम्—उत्पत्तिः ।
इति जुहोत्यादयः ।
११०७ क्रीडा—विहारः । विजिगीषा—विजयेच्छा । व्यवहारः—व्यापारः । द्युतिः कान्तिः । मोदः—हर्षः ।
११०८—तन्तुसन्तानः—क्षेत्रे विकिरणं—गर्भाधानञ्च ।
१११०—निरसनम्—थूत्कीकरणम् ।
१११३—ह्वरणं—कौटिल्यम् ।
१११६—गात्रविक्षेपः—नर्तनम् ।
१११७—उद्वेगः—त्रासः ।
१११८—पूतीभावः—दौर्गन्ध्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

११२८ षह ।
११२९ षुह चक्यर्थे ।
११३० जृष् ।
११३१ झृष् वयोहानौ । दिवादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ क्षिपिस्त्वनुदात्तः ॥ अथ स्वादयः ॥
११३२ षूङ् प्राणिप्रसवे ।
११३३ दूङ् परितापे ।उदात्तावात्मनेभाषौ ॥
११३४ दीङ् क्षये ।
११३५ डीङ् विहायसा गतौ ।
११३६ धीङ् आधारे ।
११३७ मीङ् हिंसायाम् ।
११३८ रीङ् श्रवणे ।
११३९ लीङ् श्लेषणे ।
११४० व्रीङ् वृणोत्यर्थे । वृत् । स्वादय ओदितः ॥
११४१ पीङ् पाने ।
११४२ माङ् माने ।
११४३ ईङ् गतौ ।
११४४ प्रीङ् प्रीतौ ॥ दीङादय आत्मनेपदिनोनुदात्ताः । डीङ् तूदात्तः ॥ अथ चत्वारः परस्मैपदिनः ।
११४५ शो तनूकरणे ।
११४६ छो छेदने ।
११४७ षो अन्तकर्मणि ।
११४८ दो अवखण्डने । श्यतिप्रभृतयोऽनुदात्ताः परस्मैभाषाः । अथ आत्मनेपादिनः पञ्चदश ॥
११४९ जनी प्रादुर्भावे ।
११५० दीपी दीप्तौ ।
११५१ पूरी आप्यायने ।
११५२ तूरी गतित्वरणहिंसनयोः
११५३ धूरी ।
११५४ गूरी हिंसागत्योः ।
११५५ घूरी ।
११५६ जूरी हिंसावयोहान्योः ॥
११५७ शूरी हिंसास्तम्भनयोः।
११५८ चूरी दाहे ।
११५९ तप (पत) ऐश्वर्ये वा ।
११६० वृतु वरणे । वावृतु इति केचित् ।
११६१ क्लिश उपतापे ।
११६२ काशृ दीप्तौ ।

११२८—चक्यर्थः—तृप्तिः ।
११३३—परितापो—दुःखम् ।
११४७—अन्तकर्म—विनाशः ।
११४८—अवखण्डनं—छेदनम् ।
११४९—प्रादुर्भावः—अतिक्रान्तोत्पत्तिः ।
११६१—उपतापो—रोगः ।

In Public domain. Digitization Muthulakshmi Research Academy

११६३ वाशृ शब्दे ॥ जन्याद्-य उदात्ता अनुदात्तेत आत्मनेभाषाः। तपिस्त्व-नुदात्तः ॥ अथ पञ्च स्वरितेतः ॥
११६४ मृष तितिक्षायाम् ।
११६५ शुचिर् पूतीभावे ॥ उदात्तौ स्वरितेतावुभय-तोभाषौ ॥
११६६ णह बन्धने ।
११६७ रञ्ज रागे ।
११६८ शप आक्रोशे ॥ णहाद्-यस्त्रयो ऽनुदात्ताः स्व-रितेत उभयतोभाषाः॥ अथ एकादश आत्मने-पदिनः ॥
११६९ पद गतौ ।
११७० खिद दैन्ये ।
११७१ विद सत्तायाम् ।
११७२ बुध अवगमने ।
११७३ युध संप्रहारे ।
११७४ अनोरुध कामे ।
११७५ अण प्राणने । अन इ-त्येके ॥
११७६ मन ज्ञाने ।
११७७ युज समाधौ ।
११७८ सृज विसर्गे ।
११७९ लिश अल्पीभावे ॥ प-दादयोऽनुदात्ता अनु-दात्तेत आत्मनेभाषाः ॥ अण् तूदात्तः ॥ अथ आगणान्ताः परस्मैप-दिनः अष्टषष्टिः ॥
११८० राधोऽकर्मकाद्वृद्धावेव ।
११८१ व्यध ताडने ।
११८२ पुष पुष्टौ ।
११८३ शुष शोषणे ।
११८४ तुष प्रीतौ ।
११८५ दुष वैकृत्ये ।
११८६ श्लिष आलिङ्गने ।
११८७ शक विभाषितो मर्षणे । उभयपदी ॥
११८८ ष्विदा गात्रप्रक्षरणे । ञि ष्विदा इत्येके ॥
११८९ क्रुध क्रोधे ।
११९० क्षुध बुभुक्षायाम् ।
११९१ शुध शौचे ।
११९२ षिधु संराद्धौ ॥ राधा-दयोऽनुदात्ता उदात्तेतः परस्मैभाषाः ॥ वेटः ॥

११६४—तितिक्षा—सहनम् ।
११६८—आक्रोशः—विरूद्धानुध्यानम् ।
११९०—बुभुक्षा—भोक्तुमिच्छा ।

In Public domain. Digitization Muthulakshmi Research Academy

११९३ रध हिंसासंराध्योः ।
११९४ णश अदर्शने ।
११९५ तृप प्रीणने ।
११९६ दृप हर्षमोहनयोः ।
११९७ द्रुह जिघांसायाम् ।
११९८ मुह वैचित्त्ये ।
११९९ ष्णुह उद्गिरणे ।
१२०० ष्णिह प्रीतौ ॥ वृत् ॥ रधादयो वेटः उदात्तेतः परस्मैभाषाः ॥
१२०१ शमु उपशमे ।
१२०२ तमु काङ्क्षायाम् ।
१२०३ दमु उपशमे ।
१२०४ श्रमु तपसि खेदे च ।
१२०५ भ्रमु अनवस्थाने ।
१२०६ क्षमू सहने ।
१२०७ क्लमु ग्लानौ ।
१२०८ मदी हर्षे ॥ वृत् ॥ शमादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ क्षमू तुवेट् ॥
१२०९ असु क्षेपणे ।
१२१० यसु प्रयत्ने ।
१२११ जसु मोक्षणे ।

११९७—जिघांसा—हननेच्छा ।
११९८—वैचित्त्यम्—अविवेकः ।
११९९—उद्गिरणम्—बहिर्निःसारणम् ।

१२१२ तसु उपक्षये ।
१२१३ दसु च ।
१२१४ वसु स्तम्भे । भसु इति केचित् ॥
१२१५ व्युष विभागे । व्युस इत्यन्ये । बुस इत्यपरे ॥
१२१६ प्लुष दाहे ।
१२१७ बिस प्रेरणे ।
१२१८ कुंस संश्लेषणे ।
१२१९ बुस उत्सर्गे ।
१२२० मुस खण्डने ।
१२२१ मसी पारिणामे । समी इत्येके ॥
१२२२ लुट विलोडने ।
१२२३ उच समवाये ।
१२२४ भृशु
१२२५ भ्रंशु अधःपतने ।
१२२६ वृश वरणे ।
१२२७ कृश तनूकरणे ।
१२२८ ञि तृषा पिपासायाम् ।
१२२९ हृष तुष्टौ ।
१२३० रुष
१२३१ रिष हिंसायाम् ।

१२२१—परिणामो—विकारः ।
१२२३—समवायः—सम्बन्धः ।
१२२८—पिपासा—पानेच्छा ।

In Public domain. Digitization Muthulakshmi Research Academy

१२३२ डिप क्षेपे ।
१२३३ कुप क्रोधे ।
१२३४ गुप व्याकुलत्वे ।
१२३५ युप
१२३६ रुप
१२३७ लुपबिमोहने । (ष्टुप समुच्छ्राये) ।
१२३८ लुभ गार्ध्ये (गार्ध्न्ये) ।
१२३९ क्षुभ सञ्चलने ।
१२४० णभ
१२४१ तुभ हिंसायाम् । क्षुभिनभितुभयो द्युतादौ क्र्यादौ च पठ्यन्ते ।
१२४२ क्लिदू आर्द्रीभावे ।
१२४३ ञिमिदा स्नेहने ।
१२४४ ञिक्ष्विदास्नेहनमोचनयो:
१२४५ ऋधु वृद्धौ ।
१२४६ गृधु अभिकाङ्क्षायाम् । वृत ॥ असुप्रभृतय उदात्तेतः परस्मैभाषाः ॥ दिवादिराकृतिगण इति केचित् ॥ इति श्यन्विकरणा दिवादयः॥४॥ (१४०)

१२३८—गार्ध्यम्—आकांक्षा ।

इति दिवादयः ।

अथ स्वादयः ।

१२४७ षुञ् अभिषवे ।
१२४८ षिञ् बन्धने ।
१२४९ शिञ निशाने ।
१२५० डुमिञ् प्रक्षेपणे ।
१२५१ चिञ् चयने ।
१२५२ स्तृञ् आच्छादने ।
१२५३ कृञ् हिंसायाम् ।
१२५४ वृञ् वरणे ।
१२५५ धुञ् कम्पने । धूञ् इत्येके । स्वादयोऽनुदात्ता उभयतोभाषाः ॥ वृञ् उदात्तः ॥ अथ परस्मैपदिनः अष्टौ ॥
१२५६ टुदु उपतापे ।
१२५७ हि गतौ वृद्धौ च ।
१२५८ पृ प्रीतौ ।
१२५९ स्पृ प्रीतिपालनयोः । प्रीतिचलनयोः इत्यन्ये । 'चलनं जीवनम्' इति स्वामी । स्मृ इत्येके ॥ पृणोत्यादयस्त्रयोऽपि छान्दसाः इत्याहुः ॥

१२४७—अभिषवः—स्नपनं—स्नानं—पीडनं—सुरासन्धानञ्च ।
१२४९- निशानं—तीक्ष्णीकरणम् ।
१२५१ —चयनं —राशीकरणम् ।

In Public domain. Digitization Muthulakshmi Research Academy

१२६० आप्लृ व्याप्तौ।

१२६१ शक्लृ शक्तौ।

१२६२ राध

१२६३ साध संसिद्धौ। दुनोतिप्रभृतयोऽनुदात्ताः परस्मैभाषाः॥ अथ द्वौ आत्मनेपदिनौ॥

१२६४ अशू व्याप्तौ सङ्घाते च।

१२६५ ष्टिघ आस्कन्दने॥ अशिस्तिघी उदात्तावनुदात्तेतावात्मनेभाषौ॥ अथ आगणान्ताः परस्मैपदिनः षोडश॥

१२६६ तिक

१२६७ तिग गतौ च।

१२६८ षघ हिंसायाम्।

१२६९ ञिधृषा प्रागल्भ्ये।

१२७० दन्भु दम्भने।

१२७१ ऋधु वृद्धौ। तृप प्रीणने इत्येके॥ छन्दसि॥ अथ आगणान्ताश्छान्दसाः॥

१२७२ अह व्याप्तौ।

१२७३ दघ घातने पालने च।

१२६१—शक्तिः—सामर्थ्यम्।

१२६९—प्रागल्भ्यं -धार्ष्ट्यम्।

इति स्वादयः

१२७४ चमु भक्षणे।

१२७५ रि

१२७६ क्षि

१२७७ चिरि

१२७८ जिरि

१२७९ दाश

१२८० दृ हिंसायाम्॥ क्षिर् भाषायाम् इत्येके॥ ऋक्षीत्येक एवाजादिरित्येके। रेफवानित्यन्ये॥ वृत्॥ तिकादय उदात्ता उदात्तेतः परस्मैभाषाः॥ इति श्नुविकरणाः स्वादयः॥ ५॥ (३४)

अथ तुदादयः।

अथ षडुभयपदिनः॥

१२८१ तुद व्यथने।

१२८२ णुद प्रेरणे।

१२८३ दिश अतिसर्जने।

१२८४ भ्रस्ज पाके।

१२८५ क्षिप प्रेरणे।

१२८६ कृष विलेखने॥ तुदादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः॥

१२८१—व्यथनं—दुःखदानम्।

१२८३—अतिसर्जनम्—दानम्।

१२८६—विलेखनम्—आकर्षणम्।

In Public domain. Digitization Muthulakshmi Research Academy

१२८७ ऋषी गतौ । उदात्त उदात्तेत्परस्मैपदी ॥ अथ चत्वार आत्मनेपदिनः ॥

१२८८ जुषी प्रीतिसेवनयोः

१२८९ ओविजी भयचलनयोः ।

१२९० ओलजी

१२९१ ओलस्जी व्रीडायाम् । जुषादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ अथ परस्मैपदिनः ।

१२९२ ओव्रश्चू छेदने ।

१२९३ व्यच व्याजीकरणे ।

१२९४ उछि उञ्छे ।

१२९५ उछी विवासे ।

१२९६ ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु ।

१२९७ मिच्छ उत्क्लेशे ।

१२९८ जर्ज

१२९९ चर्च

१३०० झर्झ परिभाषणभर्त्सनयोः ।

१३०१ त्वच संवरणे ।

१३०२ ऋच स्तुतौ ।

१३०३ उब्ज आर्जवे ।

१३०४ उज्झ उत्सर्गे

१३०५ लुभ विमोहने ।

१३०६ रिफ कत्थनयुद्धनिन्दाहिंसादानेषु । रिह इत्येके ।

१३०७ तृप

१३०८ तृम्फ तृप्तौ द्वावपि फान्तावित्येके ।

१३०९ तुप

१३१० तुम्प

१३११ तुफ

१३१२ तुम्फ हिंसायाम् ।

१३१३ दृप

१३१४ दृम्फ उत्क्लेशे । प्रथमोऽपि द्वितीयान्त इत्येके ।

१३१५ ऋफ

१३१६ ऋम्फ हिंसायाम् ।

१३१७ गुफ

१३१८ गुम्फ ग्रन्थे ।

१३१९ उभ

१३२० उम्भ पूरणे ।

१३२१ शुभ

१३२२ शुम्भ शोभार्थे ।

१३२३ दृभी ग्रन्थे ।

१३२४ चृती हिंसाश्रन्थनयोः ।

१२९३—व्याजीकरणम्—छद्मकरणम् ।
१२९४—उञ्छः—कणश आदानम् ।
१२९५—विवासः—समाप्तिः ।
१२९६—इन्द्रियप्रलयः—इन्द्रियविनाशः । मूर्त्तिभावः—काठिन्यम् ।
१२९७—उत्क्लेशः—पीडा ।

In Public domain. Digitization Muthulakshmi Research Academy

१३२५ विध विधाने ।
१३२६ जुडगतौ । जुनइत्येके ॥
१३२७ मृड सुखने ।
१३२८ पृड च ।
१३२९ पृण प्रीणने ।
१३३० वृण च ।
१३३१ मृण हिंसायाम् ।
१३३२ तुण कौटिल्ये ।
१३३३ पुण कर्मणि शुभे ।
१३३४ मुण प्रतिज्ञाने ।
१३३५ कुण शब्दोपकरणयोः ।
१३३६ शुन गतौ ।
१३३७ तुण हिंसागतिकौटिल्येषु ।
१३३८ घुण ।
१३३९ घुर्ण भ्रमणे ।
१३४० खुर ऐश्वर्यदीप्त्योः ।
१३४१ कुर शब्दे ।
१३४२ खुर छेदने ।
१३४३ मुर संवेष्टने ।
१३४४ क्षुरविलेखने ।
१३४५ घुर भीमार्थशब्दयोः ।
१३४६ पुर अग्रगमने ।
१३४७ वृहू उद्यमने । वृहू इत्यन्ये ॥
१३४८ तृहु
१३४९ स्तृह
१३५० तृन्हू हिंसार्थाः ।
१३५१ इष इच्छायाम् ।
१३५२ मिषस्पर्द्धायाम् ।
१३५३ किलश्वैत्यक्रीडनयोः ।
१३५४ तिल स्नेहने ।
१३५५ चिल बसने ।
१३५६ चल विलसने ।
१३५७ इल स्वप्नक्षेपणयोः ।
१३५८ विल सम्वरणे ।
१३५९ बिल भेदने ।
१३६० णिल गहने ।
१३६१ हिल भावकरणे ।
१३६२ शिल
१३६३ षिल उञ्छे ।
१३६४ मिल श्लेषणे ।
१३६५ लिख अक्षरविन्यासे ।
१३६६ कुट कौटिल्ये ।
१३६७ पुट संश्लेषणे ।
१३६८ कुच संकोचने ।
१३६९ गुज शब्दे ।
१३७० गुड रक्षायाम् ।
१३७१ डिप क्षेपे ।
१३७२ छुर छेदने ।
१३७३ स्फुट विकसने ।
१३७४ मुट आक्षेपमर्दनयोः ।

१३६१—भावकरणम्—अभिप्रायसूचनम् ।
१३६६—कलहकर्म—विवादः ।

In Public domain. Digitization Muthulakshmi Research Academy

१३७५ त्रुट छेदने।
१३७६ तुट कलहकर्मणि।
१३७७ चुट
१३७८ छुट छेदने।
१३७९ जुट बन्धने।
१३८० कड मदे।
१३८१ लुठ संश्लेषणयोः। (लुट इत्येके। लुड इत्यन्ये)।
१३८२ कृड घनत्वे।
१३८३ कुड बाल्ये।
१३८४ पुड उत्सर्गे।
१३८५ घुट प्रतिघाते।
१३८६ तुड तोडने।
१३८७ थुड
१३८८ स्थुड संवरणे। खुड छुड इत्येके॥
१३८९ स्फुर
१३९० स्फुल संचलने। स्फुर स्फुरणे। स्फल सञ्चलने इत्येके॥ स्फर इत्यन्ये।
१३९१ स्फुड
१३९२ चुड
१३९३ व्रुड संवरणे।
१३९४ क्रुड
१३९५ मृड निमज्जन इत्येके॥ व्रश्चादय उदात्ता उदात्तेतः परस्मैभाषाः॥
१३९६ गुरी उद्यमने॥ उदात्ताऽनुदात्तेदात्मनेपदी॥ अथ चत्वारः परस्मैपदिनः॥
१३९७ णू स्तवने॥
१३९८ धू विधूनने॥ उदात्तौ परस्मैभाषौ।
१३९९ गु पुरीषोत्सर्गे।
१४०० ध्रु गतिस्थैर्ययोः। ध्रुव इत्येके॥ अनुदात्तौ परस्मैपदिनौ।
१४०१ कुङ् शब्दे। उदात्त आत्मनेपदी॥ दीर्घान्त इति कैयटादयः। ह्रस्वान्त इति न्यासः। वृत्॥ कुटादयो गताः।
१४०२ पृङ् व्यायामे।
१४०३ मृङ् प्राणत्यागे। अनुदात्तावात्मनेभाषौ॥ अथ परस्मैपदिनः सप्त॥
१४०४ रि
१४०५ पि गतौ।
१४०६ धि धारणे।
१४०७ क्षि निवासगत्योः॥ रि-

१३८२—घनत्वं—सान्द्रता।

१३९८—विधूननं—कम्पनम्।
१३९९—पुरीषोत्सर्गः—मलत्यागः।

In Public domain. Digitization-Muthulakshmi Research Academy

यत्यादयोऽनुदात्ताः परस्मैभाषाः ॥
१४०८ पॄ प्रेरणे ।
१४०९ कॄ विक्षेपे ।
१४१० गॄ निगरणे ॥ उदात्ताः परस्मैभाषाः ॥
१४११ दृङ् आदरे ।
१४१२ धृङ् अवस्थाने ॥ अनुदात्तावात्मनेभाषौ ॥ अथ षोडश परस्मैपदिनः ॥
१४१३ प्रच्छ ज्ञीप्सायाम् ॥ वृत् ॥ किरादयो गताः ।
१४१४ सृज विसर्गे ।
१४१५ टुमस्जो शुद्धौ ।
१४१६ रुजो भङ्गे ।
१४१७ भुजो कौटिल्ये ।
१४१८ छुप स्पर्शे ।
१४१९ रुश ।
१४२० रिश हिंसायाम् ।
१४२१ लिश गतौ ।
१४२२ स्पृश संस्पर्शने ।
१४२३ विच्छ गतौ ।
१४२४ विश प्रवेशने ।
१४२५ मृश आमर्शने ।
१४२६ णुद प्रेरणे ।

१४२५—आमर्शनम्—स्पर्शः ।

१४२७ षद्लृ विशरणगत्यवसादनेषु ।
१४२८ शद्लृ शातने ॥ पृच्छत्यादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः ॥ विच्छस्तूदात्तः ॥ अथ षट् स्वरितेतः ।
१४२९ मिल सङ्गमे । उदात्तः स्वरितेदुभयतोभाषः ॥
१४३० मुच्लृ मोक्षणे ।
१४३१ लुप्लृ छेदने ।
१४३२ विद्लृ लाभे ।
१४३३ लिप उपदेहे ।
१४३४ षिच् क्षरणे ॥ मुचादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ॥ विन्दतिस्तूदात्तः ॥
१४३५ कृती छेदने ॥ उदात्त उदात्तेत्परस्मैपदी ॥
१४३६ खिद परिघाते ॥ अनुदात्त उदात्तेत्परस्मैपदी ॥
१४३७ पिश अवयवे ॥ अयं दीपनायामपि ॥ उदात्त उदात्तेत्परस्मैपदी ॥ वृत् ॥ मुचादयः तुदाद-

१४२८—शातनम्—दुःखानुभवः ।
१४३३—उपदेहो—वृद्धिः ।

इति तुदादयः ।

In Public domain. Digitization Muthulakshmi Research Academy

श्च वृत्ताः ॥ इति शविकरणास्तुदादयः ॥ ६ ॥

अथ रुधादयः ।

आद्या नव स्वरितेतः ॥

१४३८ रुधिर आवरणे ।
१४३९ भिदिर् विदारणे ।
१४४० छिदिर् द्वैधीकरणे ।
१४४१ रिचिर विरेचने ।
१४४२ विचिर् पृथग्भावे ।
१४४३ क्षुदिर् संपेषणे ।
१४४४ युजिर् योगे ॥ रुधादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ॥
१४४५ उछृदिर् दीप्तिदेवनयोः ।
१४३६ उतृदिर् हिंसाऽनादरयोः ॥ उदात्तौ स्वरितेतावुभयतोभाषौ ॥
१४४७ कृती वेष्टने ॥ उदात्त उदात्तेत्परस्मैपदी ॥
१४४८ ञिइन्धी दीप्तौ ॥ उदात्तोऽनुदात्तेदात्मनेपदी ॥
१४४९ खिद दैन्ये ।
१४५० विद विचारणे ॥ अनुदात्तावनुदात्तेतावात्मनेपदिनौ । अथ परस्मैपदिनः ॥
१४५१ शिष्लृ विशेषणे ।
१४५२ पिष्लृ संचूर्णने ।
१४५३ भन्जो आमर्दने ।
१४५४ भुज पालनाभ्यवहारयोः ॥ शिषादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः ॥
१४५५ तृह ।
१४५६ हिसि हिंसायाम् ।
१४५७ उन्दी क्लेदने ।
१४५८ अन्जू व्यक्तिमर्षणकान्तिगतिषु ।
१४५९ तञ्चु सङ्कोचने ।
१४६० ओविजी भयचलनयोः ।
१४६१ वृजी वर्जने ।
१४६२ पृची सम्पर्के ॥ तृहाद-

१४३८—आवरणम्—अवरोधः । आच्छादनम्
१४३९—विदारणम्—भेदनम् ।
१४४१—विरेचनम्—पृथग्भावः ।
१४४३—संपेषणम्—संचूर्णनम
१४४४—योगः—सम्बन्धः ।
१४५४— अभ्यवहारः—भोजनम् ।
१४५७—क्लेदनम्—आर्द्रीभावः ।
१४५८—व्यक्तिः—विवेचनम् । म्रक्षणं स्निग्धता ।
१४६२—सम्पर्कः—सम्बन्धः ।

इति रुधादयः ।

In Public domain. Digitization Muthulakshmi Research Academy

य उदात्ता उदात्तेतः परस्मैपदिनः ॥ वृत् ॥

इति श्नम्विकरणा रुधादयः ॥ ७ ॥

अथ तनादयः ।

आद्याः सप्त स्वरितेतः॥

१४६३ तनु विस्तारे ।

१४६४ षणु दाने ।

१४६५ क्षणु हिंसायाम् ।

१४६६ क्षिणु च ।

१४६७ ऋणु गतौ ।

१४६८ तृणु अदने ।

१४६९ घृणु दीप्तौ ॥ तनादय उदात्ताः स्वरितेत उभयतोभाषाः ॥

१४७० वनु याचने । अयं चन्द्रमते परस्मैपदी ॥

१४७१ मनु अवबोधने ॥ उदात्तावनुदात्तेतावात्मनेभाषौ ॥

१४७२ डुकृञ् करणे ॥ अनुदात्त उभयतोभाषः ॥ वृत् ॥ इत्युविकरणास्तनादयः ॥ ८ ॥

१४६३—विस्तारः—दैर्घ्यम् ।

१४६८—अदनम्—भक्षणम् ।

१४७१—अवबोधनम्—ज्ञानम् ।

इति तनादयः ।

अथ क्र्यादयः ।

१४७३ डुक्रीञ् द्रव्यविनिमये ।

१४७४ प्रीञ् तर्पणे कान्तौ च ।

१४७५ श्रीञ् पाके ।

१४७६ मीञ् बन्धने ।

१४७७ षिञ् बन्धने ।

१४७८ स्कुञ् आप्रवणे । स्तम्भु स्तुम्भु स्कम्भु स्कुम्भु रोधन इत्येके । प्रथमतृतीयौ स्तम्भे । इति माधवः । द्वितीयो निष्कोषणे चतुर्थो धारण इत्यन्ये । चत्वार इमे परस्मैपदिनः सौत्राश्च ॥

१४७९ युञ् बन्धने ॥ क्र्यादयोऽनुदात्ता उभयतोभाषाः ॥

१४८० क्नूञ् शब्दे ।

१४८१ द्रूञ् हिंसायाम् ।

१४८२ पूञ् पवने ।

१४८३ लूञ् छेदने ।

१४८४ स्तॄञ् आच्छादने ।

१४८५ कॄञ् हिंसायाम् ।

१४८६ वृञ् वरणे ।

१४८७ धूञ् कम्पने ॥ क्नूप्रभृ-

१४७३—द्रव्यविनिमयः—क्रयणम् ।

१४८२—पवनम्—पवित्रीकरणम् ।

In Public domain. Digitization Muthulakshmi Research Academy

तय उदात्ता उभयतो-
भाषाः ॥ अथ बध्नात्यन्ता
परस्मैपदिनः ॥
१४८८ शॄ हिंसायाम्
१४८९ पॄ पालनपूरणयोः ।
१४९० वॄ वरणे । भरण इत्येके॥
१४९१ भॄ भर्त्सने । भरणेऽप्येके।
१४९२ मॄ हिंसायाम् ।
१४९३ दॄ विदारणे ।
१४९४ जॄ वयोहानौ । झ इत्येके॥
धॄ इत्यन्ये ॥
१४९५ नॄ नये
१४९६ कॄ हिंसायाम् ।
१४९७ ॠ गतौ
१४९८ गॄ शब्दे ॥ शॄणातिप्रभृ-
तय उदात्ता उदात्तेतः
परस्मैपदिनः
१४९९ ज्या वयोहानौ ।
१५०० री गतिरेषणयोः ।
१५०१ ली श्लेषणे ।
१५०२ व्ली वरणे ।
१५०३ प्ली गतौ ॥ वृत् ॥ ल्वाद-
यो गताः । प्वादयोऽपी-
त्येके ॥
१५०४ व्री वरणे ।

१५०० —रेषणं—हिंसा ।

१५०५ भ्री भये । भर इत्येके ॥
१५०६ क्षीष् हिंसायाम् ।
१५०७ ज्ञा अवबोधने ।
१५०८ बन्ध बन्धने ॥ ज्यादयो
ऽनुदात्तेत उदात्तेतः
परस्मैभाषाः ॥
१५०९ वृङ् सम्भक्तौ ॥ उदात्त
आत्मनेपदी ॥
१५१० श्रन्थ विमोचनप्रतिह
र्षयोः ।
१५११ मन्थ विलोडने ।
१५१२ श्रन्थ
१५१३ ग्रन्थ सन्दर्भे ।
१५१४ कुन्थ संश्लेषणे । संक्ले
श इत्येके । कुथ इति
दुर्गः ॥
१५१५ मृद क्षोदे ।
१५१६ मृड च । अयं सुखेऽपि ॥
१५१७ गुध रोषे ।
१५१८ कुष निष्कर्षे ।
१५१९ क्षुभ सञ्चलने ।
१५२० णभ
१५२१ तुभ हिंसायाम् ।
१५२२ क्लिशू विबाधने ।
१५२३ अश भोजने ।
१५२४ उध्रस उञ्छे ।

१५१५—क्षोदः- सम्पेषणम्
१५२२—विबाधनम्—पीडा ।

In Public domain. Digitization: Muthulakshmi Research Academy

१५२५ इष आभीक्ष्ण्ये ।
१५२६ विष विप्रयोगे ।
१५२७ प्रुष
१५२८ प्लुष स्नेहनसेवनपूरणेषु ।
१५२९ पुष पुष्टौ ।
१५३० मुष स्तेये ।
१५३१ खच भूतप्रादुर्भावे । वान्तोऽयमित्येके ॥
१५३२ हेठ च ॥ क्र्यादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ क्लिशिस्तु वेट् । विषस्त्वनुदात्तः ॥
१५३३ ग्रह उपादाने ॥ उदात्तः स्वरितेदुभयतोभाषः ॥
इति श्नाविकरणाः क्र्यादयः
अथ चुरादयः ।
१५३४ चुर स्तेये ।
१५३५ चिति स्मृत्याम् ।
१५३६ यत्रि सङ्कोचे ।
१५३७ स्फुडि परिहासे । स्फुटि इत्यपि ॥
१५३८ लक्ष दर्शनाङ्कनयोः ।
१५३९ कुद्रि अनृतभाषणे । कुद इत्येके । कुडि इत्यपरे ॥

१५३१—प्राणिनोऽतिक्रान्तोत्पत्तिः ।
इति क्र्यादयः ।

१५४० लड उपसेवायाम् ।
१५४१ मिदि स्नेहने । अयमनिदिदिति क्षीरस्वामिकौशिकौ ॥
१५४२ ओलडि उत्क्षेपे । ओकारो धात्ववयव इत्येके । न इत्यपरे । उलडि इत्यन्ये ॥
१५४३ जल अपवारणे । लज इत्येके ॥
१५४४ पीड अवगाहने ।
१५४५ नट अवस्यन्दने ।
१५४६ श्रथ प्रयत्ने । प्रस्थान इत्येके ॥
१५४७ बध संयमने । बन्ध इति चान्द्राः ॥
१५४८ पॄ पूरणे ।
१५४९ ऊर्ज बलप्राणनयोः ।
१५५० पक्ष परिग्रहे । (चूर्ण प्रेषणे)
१५५१ वर्ण
१५५२ चूर्ण प्रेरणे । वर्ण वर्णन इत्येके ।
१५५३ प्रथ प्रख्याने ।
१५५४ पृथ प्रक्षेपे । पथ इत्येके ॥
१५५५ षम्ब सम्बन्धने ।
१५५६ शम्ब च । साम्ब इत्येके ॥
१५५७ भक्ष अदने ।

In Public domain. Digitization Muthulakshmi Research Academy

१५५८ कुट्ट छेदनभर्त्सनयोः । पूरण इत्येके ॥
१५५९ पुट्ट
१५६० चुट्ट अल्पीभावे ।
१५६१ अट्ट
१५६२ षुट्ट अनादरे ।
१५६३ लुण्ट स्तेये । लुण्ठ इति केचित् ॥
१५६४ शठ
१५६५ श्वठ असंस्कारगत्योः । श्वठि इत्येके ॥
१५६६ तुजि
१५६७ पिजि हिंसाबलादाननिकेतषु । तुज पिज इति केचित् । लजि लुजि इत्येके ॥
१५६८ पिस गतौ ।
१५६९ षान्त्व सामप्रयोगे ।
१५७० श्वल्क
१५७१ वल्क परिभाषणे ।
१५७२ ष्णिह स्नेहने । स्फिट इत्येके ॥
१५७३ स्मिट अनादरे । ष्मिङ् इत्येके ॥
१५७४ श्लिष श्लेषणे ।
१५७५ पथि गतौ ।
१५७६ पिछ कुट्टने ।
१५७७ छदि संवरणे ।
१५७८ श्रण दाने ।
१५७९ तड आघाते ।
१५८० खड
१५८१ खडि
१५८२ कुडि भेदने ।
१५८३ कुडि रक्षणे ।
१५८४ गुडि वेष्टने । रक्षणे इत्येके । कुठि इत्यन्ये । गुठि इत्यपरे ॥
१५८५ खुडि खण्डने ।
१५८६ वटि विभाजने । वडि इति केचित् । (चडि कोपे चण्डेत्यन्ये) ।
१५८७ मडि भूषायां हर्षे च ।
१५८८ भडि कल्याणे ।
१५८९ छर्द वमने ।
१५९० पुस्त
१५९१ बुस्त आदरानादरयोः ।
१५९२ चुद संचोदने ।
१५९३ नक्क
१५९४ धक्क नाशने ।
१५९५ चक्क
१५९६ चुक्क व्यथने ।
१५९७ क्षलशौचकर्मणि ।
१५९८ तल प्रतिष्ठायाम् ।
१५९९ तुल उन्माने ।

In Public domain. Digitization Muthulakshmi Research Academy

१६०० दुल उत्क्षेपे ।
१६०१ पुल महत्त्वे ।
१६०२ चुल समुच्छ्राये ।
१६०३ मूल रोहणे ।
१६०४ कल
१६०५ विल क्षेपे ।
१६०६ बिल भेदने ।
१६०७ तिल स्नेहने ।
१६०८ चल भृतौ ।
१६०९ पाल रक्षणे ।
१६१० लूष हिंसायाम् ।
१६११ शुल्ब माने ।
१६१२ शूर्प च ।
१६१३ चुट छेदने ।
१६१४ मुट संचूर्णने ।
१६१५ पडि
१६१६ पसि नाशने ।
१६१७ व्रज मार्गसंस्कारगत्योः ।
१६१८ शुल्क अतिस्पर्शने । अतिसर्जन इत्येके ॥
१६१९ चपि गत्याम् ।
१६२० क्षपि क्षान्त्याम् ।
१६२१ छजि कृच्छ्रजीवने ।
१६२२ श्वर्त गत्याम् ।
१६२३ श्वभ्र च ।
१६२४ ज्ञप ज्ञानज्ञापनमारणतोषणनिशाननिशामनेषु । मिच्चेत्येके ॥
१६२५ यम च परिवेषणे । चान्मित् ॥
१६२६ चह परिकल्कने । चप इत्येके ॥
१६२७ रह त्यागे ।
१६२८ बल प्राणने ।
१६२९ चिञ् चयने । नान्ये मितोऽहेतौ ॥
१६३० घट्ट चलने ।
१६३१ मुस्त सङ्घाते ।
१६३२ खट्ट संवरणे ।
१६३३ षट्ट ।
१६३४ स्फिट्ट ।
१६३५ चुबि हिंसायाम् ।
१६३६ पूल सङ्घाते । पूर्ण इत्येके । पुण इत्यन्ये ॥
१६३७ पुंस अभिवर्धने ।
१६३८ टकि बन्धने । (व्यप क्षेपे व्यय विप इत्येके ।)
१६३९ धूस कान्तिकरणे । मूर्धन्यान्त इत्येके । तालव्यान्त इत्यन्ये ॥
१६४० कीट वर्णे ।
१६४१ चूर्ण सङ्कोचने ।
१६४२ पूज पूजायाम् ।
१६४३ अर्क स्तवने । तपन इ-

In Public domain. Digitization Muthulakshmi Research Academy

त्येके ॥
१६४४ शुठ आलस्ये ।
१६४५ शुठि शोषणे ।
१६४६ जुड प्रेरणे ।
१६४७ गज
१६४८ मार्ज शब्दार्थौ ।
१६४९ मर्चच ।
१६५० घृ प्रस्रवणे । स्रावण इ-
त्येके ॥
१६५१ पचि विस्तारवचने ।
१६५२ तिज निशातने ।
१६५३ कृत संशब्दने ।
१६५४ वर्ध छेदनपूरणयोः ।
१६५५ कुबि आच्छादने । कु-
भि इत्येके ॥
१६५६ लुबि ।
१६५७ तुबि अदर्शने । अर्दन
इत्येके ॥
१६५८ ह्लप व्यक्तायां वाचि । क्ल-
प इत्येके । ह्रप इत्यन्ये ॥
१६५९ चुटि छेदने ।
१६६० इलप्रेरणे ।
१६६१ म्रक्ष म्लेच्छने ।
१६६२ म्लेच्छ अव्यक्तायां वा-
चि ।
१६६३ ब्रूस
१६६४ बर्ह हिंसायाम् । केचदि-
ह गर्ज गर्द शब्दे गर्ध
अभिकाङ्क्षायाम् इति प-
ठन्ति ॥
१६६५ गुर्द पूर्वनिकेतने ।
१६६६ जासि रक्षणे । मोक्षण
इति केचित् ॥
१६६७ ईड स्तुतौ ।
१६६८ जसु हिंसायाम् ।
१६६९ पिडि सङ्घाते ।
१६७० रुष रोषे । रुट इत्येके ॥
१६७१ डिप क्षेपे ।
१६७२ ष्टुप समुच्छ्राये । आकु-
स्मादात्मनेपदिनः ॥
१६७३ चित संचेतने ।
१६७४ दशि दंशने ।
१६७५ दसि दर्शनदंशनयोः ।
दस इत्यप्येके ॥
१६७६ डप
१६७७ डिप सङ्घाते ।
१६७८ तत्रि कुटुम्बधारणे । कु-
टुम्बेतिधात्वन्तरमिति
चान्द्राः ॥
१६७९ मत्रि गुप्तपरिभाषणे ।
१६८० स्पश ग्रहणसंश्लेषणयोः ।
१६८१ तज
१६८२ भर्त्स तर्जने ।
१६८३ बस्त

In Public domain. Digitization Muthulakshmi Research Academy

१६८४ गन्ध अर्दने ।
१६८५ विष्क हिंसायाम् । हिष्क इत्येके ॥
१६८६ निष्क परिमाणे ।
१६८७ लल ईप्सायाम् ।
१६८८ कूण सङ्कोचे ।
१६८९ तूण पूरणे ।
१६९० भ्रूण आशाविशङ्कयोः।
१६९१ शठ श्लाघायाम् ।
१६९२ यक्ष पूजायाम् ।
१६९३ स्यम वितर्के ।
१६९४ गूर उद्यमने ।
१६९५ शम
१६९६ लक्ष आलोचने ।
१६९७ कुत्स अवक्षेपणे ।
१६९८ त्रुट छेदने । कुट इत्येके ॥
१६९९ गल स्रवणे ।
१७०० भल आभण्डने ।
१७०१ कूट आप्रदाने । अवसादन इत्येके ॥
१७०२ कुट्ट प्रतापने ।
१७०३ वञ्चु प्रलम्भने ।
१७०४ वृष शक्तिबन्धने ।
१७०५ मद तृप्तियोगे ।
१७०६ दिवु परिकूजने ।
१७०७ गृ विज्ञाने ।
१७०८ विद चेतनाख्याननिवासेषु ।
१७०९ (मान) मन स्तम्भे ।
१७१० यु जुगुप्सयाम् ।
१७११ कुस्म नाम्नो वा कुत्सितस्मयने ॥ इत्याकुस्मीयाः ॥
१७१२ चर्च अध्ययने ।
१७१३ वुक्क भाषणे ।
१७१४ शब्द उपसर्गादाविष्कारे च ।
१७१५ कण निमीलने ।
१७१६ जभि नाशने ।
१७१७ षूद क्षरणे ।
१७१८ जसु ताडने ।
१७१९ पश बन्धने ।
१७२० अम रोगे ।
१७२१ चट
१७२२ स्फुट भेदने ।
१७२३ घट सङ्घात । हन्त्यर्थाश्च ।
१७२४ दिवु मर्दने ।
१७२५ अर्ज प्रतियत्ने ।
१७२६ घुषिर् विशब्दने ।
१७२७ आङः क्रन्द सातत्ये ।
१७२८ लस शिल्पयोगे ।
१७२९ तसि
१७३० भूष अलङ्करणे । (घोष असने, मोक्ष आसने) ॥

In Public domain. Digitization Muthulakshmi Research Academy

१७३१ अर्ह पूजायाम् ।
१७३२ ज्ञा नियोगे ।
१७३३ भज विश्राणने ।
१७३४ शृधु प्रसहने ।
१७३५ यत निकारोपस्कारयोः ।
१७३६ रक
१७३७ लग आस्वादने । रघ इत्येके । रग इत्यन्ये ॥
१७३८ अञ्चु विशेषणे ।
१७३९ लिगि चित्रीकरणे ।
१७४० मुद संसर्गे ।
१७४१ त्रस धारणे । ग्रहण इत्येके । वारण इत्यन्ये ॥
१७४२ उध्रस उञ्छे । उकारो-धात्ववयव इत्येके । न-इत्यन्ये ॥
१७४३ मुच प्रमोचने मोदने च ।
१७४४ वस स्नेहच्छेदापहरणेषु ।
१७४५ चर संशये ।
१७४६ च्यु सहने । हसने चे-त्येके । च्युस इत्येके ॥
१७४७ भुवोऽवकल्कने । चि-न्तन इत्येके ॥
१७४८ कृपेश्च ॥ आ स्वदः स-कर्मककात् ॥ अतः परं स्वदिमभिव्याप्य स-म्भवत्कर्मकेभ्यएवणिच् ॥
१७४९ ग्रस ग्रहणे ।
१७५० पुष धारणे ।
१७५१ दल विदारणे ।
१७५२ पट
१७५३ पुट
१७५४ लुट
१७५५ तुजि
१७५६ मिजि
१७५७ पिजि
१७५८ लुजि
१७५९ भजि ।
१७६० लघि ।
१७६१ त्रसि ।
१७६२ पिसि ।
१७६३ कुसि ।
१७६४ दशि ।
१७६५ कुशि ।
१७६६ घट ।
१७६७ घटि ।
१७६८ बृहि ।
१७६९ बर्ह ।
१७७० बल्ह ।
१७७१ गुप ।
१७७२ धूप ।
१७७३ विच्छ ।
१७७४ चीव ।
१७७५ पुथ ।

In Public domain. Digitization Muthulakshmi Research Academy

१७७६ लोकृ।
१७७७ लोचृ।
१७७८ णद।
१७७९ कुप।
१७८० तर्क।
१७८१ वृतु।
१७८२ वृधु भाषार्थाः।
१७८३ रुट।
१७८४ लजि।
१७८५ अजि।
१७८६ दसि।
१७८७ भृशि।
१७८८ रुशि।
१७८९ शीक।
१७९० रुसि।
१७९१ नट।
१७९२ पुटि।
१७९३ जि।
१७९४ चि (जुचि)।
१७९५ रघि।
१७९६ लघि।
१७९७ अहि।
१७९८ रहि।
१७९९ महि च।
१८०० लडि।
१८०१ तुड।
१८०२ नल च।
१८०३ पूरी आप्यायने।
१८०४ रुज हिंसायाम्।
१८०५ ष्वद आस्वादने। स्वाद इत्येके॥ आ धृषाद्वा॥ इतऊर्ध्वं धृषधातुमभिव्याप्यवैकल्पिकाणिचः॥
१८०६ युज
१८०७ पृच संयमने।
१८०८ अर्च पूजायाम्।
१८०९ षह मर्षणे।
१८१० ईर क्षेपे।
१८११ ली द्रवीकरणे।
१८१२ वृजी वर्जने।
१८१३ वृञ् आवरणे।
१८१४ जॄ वयोहानौ।
१८१५ ज्रि च।
१८१६ रिच वियोजनसंपर्चनयोः।
१८१७ शिष असर्वोपयोगे।
१८१८ तप दाहे।
१८१९ तृप तृप्तौ। संदीपन इत्येके॥
१८२० छृदी संदीपने। चृप तृप दृप संदीपन इत्येके॥
१८२१ दृभी ग्रन्थे (भये)।
१८२२ दृभ सन्दर्भे।
१८२३ श्रथ मोक्षणे। हिंसायाम् इत्यन्ये॥

In Public domain. Digitization Muthulakshmi Research Academy

१८२४ म्री गतौ ।
१८२५ ग्रन्थ बन्धने ।
१८२६ शीक आमर्षणे ।
१८२७ चीक च ।
१८२८ अर्द हिंसायाम् ॥ स्वरितेत् ।
१८२९ हिंसि हिंसायाम् ।
१८३० अर्ह पूजायाम् ।
१८३१ आङ षद पद्यर्थे ।
१८३२ शुन्ध शौचकर्मणि ।
१८३३ छद अपवारणे ॥ स्वरितेत् ।
१८३४ जुष परितर्कणे । परितर्पण इत्यन्ये ॥
१८३५ धूञ् कम्पने ।
१८३६ प्रीञ् तर्पणे ।
१८३७ श्रन्थ ।
१८३८ ग्रन्थ सन्दर्भे ।
१८३९ आप्लृ लम्भने ॥ स्वरितेदयमित्येके ॥
१८४० तनु श्रद्धोपकरणयोः । उपसर्गाच्च दैर्घ्ये ॥ चन श्रद्धोपहननयोरित्येके ॥
१८४१ वद संदेशवचने ॥ स्वरितेत् ॥ अनुदात्तेदित्येके ॥
१८४२ वच परिभाषणे ।
१८४३ मान पूजायाम् ।
१८४४ भू प्राप्तावात्मनेपदी । णिच्संनियोगेनैव आत्मनेपदमित्येके ॥
१८४५ गर्ह विनिन्दने ।
१८४६ मार्ग अन्वेषणे ।
१८४७ कठि शोके । प्रायेण उत्पूर्वः उत्कण्ठावचनः॥
१८४८ मृजू शौचालङ्कारयोः ।
१८४९ मृष तितिक्षायाम् ॥ स्वरितेत् ॥
१८५० धृष प्रसहने ॥ इत्याधृषीयाः ॥ अथादन्ताः ॥
१८५१ कथ वाक्यप्रबन्धे ।
१८५२ वर ईप्सायाम् ।
१८५३ गण सङ्ख्याने ।
१८५४ शठ ।
१८५५ श्वठ सम्यगवभाषणे ।
१८५६ पट ।
१८५७ वट ग्रन्थे ।
१८५८ रह त्यागे ।
१८५९ स्तन ।
१८६० गदी देवशब्दे ।
१८६१ पत गतौ वा । अदन्त इत्येके ॥
१८६२ पष अनुपसर्गात् (गतौ)।
१८६३ स्वर आक्षेपे ।

In Public domain. Digitization Muthulakshmi Research Academy

१८६४ रच प्रतियत्ने ।
१८६५ कल गतौ सङ्ख्याने च ।
१८६६ चह परिकल्कने ।
१८६७ मह पूजायाम् ।
१८६८ सार ।
१८६९ कृप ।
१८७० श्रथ दौर्बल्ये ।
१८७१ स्पृह ईप्सायाम् ।
१८७२ भाम क्रोधे ।
१८७३ सूच पैशुन्ये ।
१८७४ खेट भक्षणे । तृतीयान्त इत्येके । खोट इत्यन्ये ॥
१८७५ क्षोट क्षेपे ।
१८७६ गोम उपलेपने ।
१८७७ कुमार क्रीडायाम् ।
१८७८ शील उपधारणे ।
१८७९ साम सान्त्वप्रयोगे ।
१८८० वेल कालोपदेशे । काल इति पृथग्धातुरित्येके ।
१८८१ पल्पूल लवनपवनयोः ।
१८८२ वात सुखसेवनयोः । गतिसुखसेवनेष्वित्येके ॥
१८८३ गवेष मार्गणे ।
१८८४ वास उपसेवायाम् ।
१८८५ निवास आच्छादने ।
१८८६ भाज पृथक्कर्मणि ।
१८८७ सभाज प्रीतिदर्शनयोः । प्रीतिसेवनयोरित्येके ॥
१८८८ ऊन परिहाणे ।
१८८९ ध्वन शब्दे ।
१८९० कूट परितापे । परिदाह इत्यन्ये ।
१८९१ सङ्केत ।
१८९२ ग्राम ।
१८९३ कुण ।
१८९४ गुण चामन्त्रणे । चात्कूटोऽपि इति मैत्रेयः ॥
१८९५ केत श्रावणे निमन्त्रणे
१८९६ कूण सङ्कोचनेऽपि ।
१८९७ स्तेन चौर्ये । आगर्वादात्मनेपादिनः ॥
१८९८ पद गतौ ।
१८९९ गृह ग्रहणे ।
१९०० मृग अन्वेषणे ।
१९०१ कुह विस्मापने ।
१९०२ शूर ।
१९०३ वीर विक्रान्तौ ।
१९०४ स्थूल परिबृंहणे ।
१९०५ अर्थ उपयाच्ञायाम् ।
१९०६ सत्र सन्तानक्रियायाम् ।
१९०७ गर्व माने ॥ इत्यागर्वीयाः
१९०८ सूत्र वेष्टने ।
१९०९ मूत्र प्रस्रवणे ।
१९१० रूक्ष पारुष्ये ।

In Public domain. Digitization Muthulakshmi Research Academy

१९११ पार ।
१९१२ तीर कर्मसमाप्तौ ।
१९१३ पुट संसर्गे ।
१९१४ धेक दर्शन इत्येके ।
१९१५ कत्र शैथिल्ये । कर्त इत्यप्येके ॥ 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (ग १८६) 'तत्करोति तदाचष्टे (ग १८७)। 'तेनातिक्रामति' (ग १८८)। 'धातुरूपं च' (ग १८९) 'आख्यानात्कृतस्तदाचष्टे कृल्लुक्प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्' (वा १७६८)। 'कर्तृकरणाद्धात्वर्थे' (ग१९०)
१९१६ वष्क दर्शने ।
१९१७ चित्र चित्रीकरणे । कदाचिद्दर्शने ॥
१९१८ अंस समाघाते ।
१९१९ वट विभाजने ।
१९२० लज प्रकाशने । वटि लजि इत्येके ॥
१९२१ मिश्र सम्पर्के ।
१९२२ सङ्ग्राम युद्धे ॥ अनुदात्तेत् ॥
१९२३ स्तोम श्लाघायाम् ।
१९२४ छिद्र कर्णभेदने । करणभेदने इत्येके । कर्ण इति धात्वन्तरमित्यपरे॥
१९२५ अन्ध दृष्ट्युपघाते । उपसंहार इत्यन्ये ॥
१९२६ दण्ड दण्डनिपातने ।
१९२७ अङ्क पदे लक्षणे च ।
१९२८ अङ्ग च ।
१९२९ सुख ।
१९३० दुःख तत्क्रियायाम् ।
१९३१ रस आस्वादनस्नेहनयोः ।
१९३२ व्यय वित्तसमुत्सर्गे ।
१९३३ रूप रूपक्रियायाम् ।
१९३४ छेद द्वैधीकरणे ।
१९३५ छद अपवारणे ।
१९३६ लाभ प्रेरणे ।
१९३७ व्रण गात्रविचूर्णने ।
१९३८ वर्ण वर्णक्रियाविस्तारगुणवचनेषु । बहुलमेतन्निदर्शनम् इत्येके ॥
१९३९ पर्ण हरितभावे ।
१९४० विष्क दर्शने ।
१९४१ क्षप प्रेरणे ।
१९४२ वस निवासे ।
१९४३ तुत्थ आवरणे । एवं

In Public domain. Digitization Muthulakshmi Research Academy

आन्दोलयति प्रेङ्खोलयति विडम्बयति अवधीरयति इत्यादि । अन्ये तु दशगणपाठो बहुलमित्याहुः । तेनेह अपठिता अपि सौत्राः लौकिकाः वैदिका अपि द्रष्टव्या इत्याहुः । इतरे तु नवगणीपठितेभ्योऽपि क्वचित् स्वार्थे णिज्भवति, बहुलग्रहणात् तेन रामो राज्यमचीकरत इत्यादि सिद्धिरित्याहुः । चुरादिभ्य एव बहुलं णिजित्यन्ये ॥ णिङ्ङ्गान्निरसने । श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च । पुच्छादिषु प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धम् ॥ इति स्वार्थणिजन्ताश्चुरादयः ॥ १० ॥

इति श्रीपाणिनिमुनिप्रणीतो धातुपाठः समाप्तः ॥

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

[सूचनापत्रम्]

	रु०	आ०	पा०
१ अष्टाध्यायीसूत्रपाठः । श्रीमत्पाणिनिमुनिविरचितः ।	०	४	०
२ धातुपाठः । श्रीमत्पाणिनिमुनिप्रणीतः ।	०	६	०
३ पाणिनीयशिक्षादिसंग्रहः । (अर्थात् १ पाणिनीयशिक्षा भाष्यसहिता, २ अष्टाध्यायीसूत्रपाठः, ३ गणपाठः, ४ वार्त्तिकपाठः, ५ परिभाषापाठः, ६ धातुपाठः, ७ लिङ्गानुशासनम्, ८ उणादिसूत्रपाठः, ९ फिट्सूत्रपाठः, १० नवाह्निकभाष्यवार्त्तिकपाठश्चेत्येतद्दशपाठसंग्रहात्मकोऽयं ग्रन्थः ।	१	८	०

हरतरह के संस्कृत ग्रन्थ तथा भाषाभाष्य
पुस्तकों के मिलने का पता —

श्रीजयकृष्णदास हरिदासगुप्त,
सेक्रेटरी, "चौखंबा संस्कृत सीरीज" आफिस ।
विद्याविलास प्रेस, गोपालमंदिर लेन,
बनारस सिटी ।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Chellam

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy